यज्ञदीक्षार्थं यजमानपत्न्या बन्धनभेदे कात्या० श्रौ० ७।४।६ सू०८।१७ सूत्रे च दृश्यम् ।

**पत्नीसंयाज** पु० वैदिके कर्मभेदे स च कात्या० श्रौ०३।७।७ सूत्रादौ उक्तस्तत्रैव दृश्यः । पत्नीसंयाजनमप्यत्र न० । “जाघन्या पत्नीसंयाजनम्’ कात्या० श्रौ० ६।८।१४

**पत्नाट** पु० पत्नौ अटत्यत्र अट—आधारे घञ् । पत्न्यगारे त्रिका० ।

**पत्मन्** पु० पत—भावे मनिन् । १पतने करणे मनिन् । २पतनसाधने यजु० ८।४८ ऋ० ५।७।७

**पत्वन्** पु० पतत्यत्र+पत—आधारे वनिप् । मार्गे यजु०२२।२८ उज्ज्वलदत्तेन उणादिसूत्रे पदीति पठित्वा पद्वन् इत्युदाहृतम् वेददीपकारस्तु तत्र पतिं मत्वा तन्मन्त्रव्याख्याने पतेः वनिपमाह । [उज्ज्वद० ।

**पत्सल** पु० पतत्यत्र पत—आधारे सरन् रस्य लत्व । मार्गे

**पथ** गतौ भ्वा० पर०सक० सेट् । पथति एदित् अपथीत् । ज्वला० पथः पाथः प(पा)थयति । पपाथ पेथतुः ।

**पथ** गतौ वा चु०उभ०पक्षे भ्वा०पर०सक०सेट् इदित् । पन्थयति ते पन्थति । अपपन्थत् त । अपन्थीत् इदित् पन्थ्यते

**पथ** पु० पथत्यत्र पथ—घञर्थे आधारे क । मार्गे त्रिका० ।

**पथक** त्रि०पथे कुशलः कन् । १मार्गकुशले २कपिलद्राक्षायां स्त्री

**पथिक** त्रि० पन्थानं गच्छति पथिन्+कन् । देशान्तरयानाय गृहान्निःसृत्य पथिगन्तरि राजनि०। [संघातादयोऽप्यत्र ।

**पथिकसंहति** पु० ६त० । पान्थसमूहे हारा० । पथिक-

**पथिकार** त्रि० पन्थानं करोति कृ—अण् उप० स० । मार्गकारके, ततः कुर्वा० ण्य । पाथिकार्य्य तदपत्ये पुंस्त्री०।

**पथिदेय** न० पथि मार्गे देयम् अलुक् स०। राज्ञे देये करभेदे हारा० । [खदिरे राजनि० ।

**पथिद्रुम** पु० पथ-इन् कर्म० । १खदिरवृक्षे जटाध० २श्वेत-

**पथिन्** पु०पथ—आधारे इनि। १मार्गे तद्भेदलक्षणादिकं यथा “त्रिंशद्धनूंषि विस्तीर्णो देशमार्गस्तु तैः कृतः । विंशद्धनुर्ग्राममार्गः सीमामार्गो दशैव तु । धनूंषि दशविस्तीर्णः श्रीमान् राजपथः स्मृतः । नृवाजिरथनागानामसम्बाधः सुसञ्चरः । धनूंषि चैव चत्वारि शाखारथ्यास्तु निर्मिताः । त्रिकराश्चोपरथ्यास्तु द्विकराप्युपरथ्यिका । जङ्घापथस्तथार्द्धत्रिपादस्तु गृहान्तरम् । वृतीपादस्त्वर्द्धपादः प्राग्वंशः पादकः स्मृतः । अवकरः परीवाहः पादमात्रः समन्ततः” देवीपु०। पथिगमनगुणाः “अध्वा मेदःकफस्थौल्यसौकुमार्य्यादिनाशनः । यत्तु चंक्रमणं नातिदेहपीड़ाकरं भवेत् । तदायुर्बलमेधाग्निप्रदमिन्द्रियशोधनम्” राजवल्लभः । २धर्माचारे च “महाजनो येन गतः स पन्थाः” भा०व० यक्षप्रश्ने ।

**पथिरक्षस्** पु० पन्थानं रक्षति रक्ष—असुन् ६त० । १रुद्रभेदे यजु० १६।८६ २मार्गरक्षके त्रि० । णिनि । पथिरक्षिन् तत्रार्थे ऋ० १०।१४।११ ।

**पथिल** पु० पथे—गतौ इलच् । पथिके उज्ज्वल० ।

**पथिवाहक** त्रि० पन्थानं वाहयति प्रापयति वाहि—ण्वुल् । १मार्गवाहके २शाकुनिके ३निष्ठुरे च शब्दमाला ।

**पथीन** नामधातुः पन्था इवाचरति पथिन्—क्विप् दीर्घः मार्गस्येवाचरणे अक० सेट् । पथीनति अपथीनीत् । एवं मथीन ऋभुक्षीण नामधातुः तत्तत्तुल्याचरणे ।

**पथेष्ठा** त्रि०पथे मार्गे तिष्ठति स्था—क्विप् अलुक्स०वेदे षत्वम् । मार्गे वर्त्तमाने ऋ० ५।५०।३। लोके तु पथस्थ इत्येव ।

**पथ्य** त्रि० पथि साधु दिगा० यत् इनो लोपः । १मार्गसाधौ पथोऽनपेतः यत् । २हिते चिकित्सादौ ३हितकारकारकभोज्यद्रव्यभेदे । पथ्यञ्च अपथ्यशब्दे २६६पृ० सुश्रुतोक्त हिताहितीयाध्याये दर्शितम् । रोगभेदे पथ्यापथ्यञ्च वैद्यके प्रसिद्धं विस्तरभयान्नोक्तम् । ४हरितकीवृक्षे पु० शब्दमाला अमरे स्त्री । ५स्वर्गवारौ ६चिर्भिटायां ७वन्ध्याकर्कटप्राञ्च स्त्री राजनि० । ८मात्रावृत्तभेदे स्त्री “त्रिष्वंशकेषु दलयोराद्येषु दृश्यते यस्याः । पथ्येति नाम तस्याः प्रकीर्त्तितं नागराजेन” वृ०र० ।

**पथ्यशाक** पु० पथ्यं शाकमस्य । तण्डुलीयशाके राजनि०।

**पथ्यादिगुग्गुलु** पु०औषधिविशेषे यथा “पथ्या बिभीतामलकीफलानां शतं क्रमेण द्विगुणाभिवृद्धम् । प्रस्थेन युक्तञ्च पलंक्रमेण द्रोणे जले संस्थितमेकरात्रम् । अर्द्धविशेषं क्वथितं कषायं भाण्डे पचेत्तत् पुनरेव लोहे । अमूनि वक्ष्ये रतान्यं दद्यात् द्रव्याणि संचूर्ण्य पलार्द्धकानि । विडङ्गदन्तीत्रिफलागुडूचीकृष्णात्रिवृन्नागरकौषधानि । यथेष्टचेष्टस्य नरस्य शीघ्रं हिमाम्बुपानानि च भोजनानि । निषेव्यमाणो विनिहन्ति रोगान् सप्टप्रसीं नूतनखञ्जताञ्च । प्लीहानमुग्रं जठराग्निगुल्मं पाण्डुत्वकण्डुत्वविनाशरक्तम् । पथ्यादिको गुग्गुलुरेष नाम्ना ख्यातः क्षितावप्रमितप्रभावः । बलेन नागेन समं मनुष्यं जवेन कुर्य्यात्तुरगेण तुल्यम् । आयुःप्रकर्षं विदधाति चक्षुर्बलं तथा पुष्टिकरो विषघ्नः । घातस्य सन्धानकरो विशेषाद्रोगेषु शस्तः सकलेषु तज्ज्ञैः” भावप्र०।